# ॥ एकादशोऽध्यायः ॥

ध्यानं
ॐ बालरवि द्युतिं इन्दु किरीटां तुङ्गकुचां नयनत्रय युक्ताम् ।
स्मेरमुखीं वरदाङ्कुश पाशा भीतिकरां प्रभजे भुवनेशीम् ॥

ॐ ऋषिरुवाच ॥ १॥

देव्या हते तत्र महासुरेन्द्रे सेन्द्राः सुरा वह्नि पुरोग मास्ताम् ।
कात्यायनीं तुष्टुवु रिष्टलाभाद् विकाशि वक्त्राब्ज विकाशिताशाः ॥ २॥

देवि प्रपन्नार्ति हरे प्रसीद प्रसीद मात र्जगतोऽखिलस्य ।
प्रसीद विश्वेश्वरि पाहि विश्वं त्वमीश्वरी देवि चराचरस्य ॥ ३॥

आधारभूता जगतस्त्वमेका मही स्वरूपेण यतः स्थितासि ।
अपां स्वरूप स्थितया त्वयैतत् आप्यायते कृत्स्न मलङ्घ्य वीर्ये ॥ ४॥

त्वं वैष्णवी शक्ति रनन्तवीर्या विश्वस्य बीजं परमासि माया ।
सम्मोहितं देवि समस्त मेतत् त्वं वै प्रसन्ना भुवि मुक्तिहेतुः ॥ ५॥

विद्याः समस्ता स्तव देवि भेदाः स्त्रियः समस्ताः सकला जगत्सु ।
त्वयैकया पूरित मम्बयैतत् का ते स्तुतिः स्तव्य परापरोक्तिः ॥ ६॥

सर्वभूता यदा देवी स्वर्ग मुक्ति प्रदायिनी ।
त्वं स्तुता स्तुतये का वा भवन्तु परमोक्तयः ॥ ७॥

सर्वस्य बुद्धि रूपेण जनस्य हृदि संस्थिते ।
स्वर्गापवर्गदे देवि नारायणि नमोऽस्तु ते ॥ ८॥

कलाकाष्ठादि रूपेण परिणाम प्रदायिनि ।
विश्वस्योपरतौ शक्ते नारायणि नमोऽस्तु ते ॥ ९॥

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ १०॥

सृष्टि स्थिति विनाशानां शक्तिभूते सनातनि ।
गुणाश्रये गुणमये नारायणि नमोऽस्तु ते ॥ ११॥

शरणागत दीनार्त परित्राण परायणे ।
सर्वस्यार्ति हरे देवि नारायणि नमोऽस्तु ते ॥ १२॥

हंसयुक्त विमानस्थे ब्रह्माणी रूप धारिणि ।
कौशाम्भः क्षरिके देवि नारायणि नमोऽस्तु ते ॥ १३॥

त्रिशूल चन्द्राहि धरे महावृषभ वाहिनि ।
माहेश्वरी स्वरूपेण नारायणि नमोऽस्तुते ॥ १४॥

मयूर कुक्कुट वृते महाशक्ति धरेऽनघे ।
कौमारी रूप संस्थाने नारायणि नमोऽस्तु ते ॥ १५॥

शङ्ख चक्र गदा शार्ङ्ग गृहीत परमायुधे ।

प्रसीद वैष्णवी रूपे नारायणि नमोऽस्तु ते ॥ १६॥

गृहीतोग्र महाचक्रे दंष्ट्रोद्धृत वसुन्धरे ।
वराह रूपिणि शिवे नारायणि नमोऽस्तु ते ॥ १७॥

नृसिंहरूपे णोग्रेण हन्तुं दैत्यान् कृतोद्यमे ।
त्रैलोक्य त्राण सहिते नारायणि नमोऽस्तु ते ॥ १८॥

किरीटिनि महावज्रे सहस्र नयनोज्ज्वले ।
वृत्र प्राणहरे चैन्द्रि नारायणि नमोऽस्तु ते ॥ १९॥

शिवदूती स्वरूपेण हत दैत्य महाबले ।
घोररूपे महारावे नारायणि नमोऽस्तु ते ॥ २०॥

दंष्ट्राकराल वदने शिरो माला विभूषणे ।
चामुण्डे मुण्डमथने नारायणि नमोऽस्तु ते ॥ २१॥

लक्ष्मि लज्जे महाविद्ये श्रद्धे पुष्टि स्वधे ध्रुवे ।
महारात्रि महाऽविद्ये नारायणि नमोऽस्तु ते ॥ २२॥

मेधे सरस्वति वरे भूति बाभ्रवि तामसि ।
नियते त्वं प्रसीदेशे नारायणि नमोऽस्तुते ॥ २३॥

सर्व स्वरूपे सर्वेशे सर्व शक्ति समन्विते ।
भयेभ्य स्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते ॥ २४॥

एतत्ते वदनं सौम्यं लोचनत्रय भूषितम् ।
पातु नः सर्वभीतिभ्यः कात्यायनि नमोऽस्तु ते ॥ २५॥

ज्वाला कराल मत्युग्रं अशेषासुर सूदनम् ।
त्रिशूलं पातु नो भीतेर् भद्रकालि नमोऽस्तु ते ॥ २६॥

हिनस्ति दैत्य तेजांसि स्वने नापूर्य या जगत् ।
सा घण्टा पातु नो देवि पापेभ्यो नः सुतानिव ॥ २७॥

असुरा सृग्वसा पङ्क चर्चितस्ते करोज्ज्वलः ।
शुभाय खड्गो भवतु चण्डिके त्वां नता वयम् ॥ २८॥

रोगा नशेषा नपहंसि तुष्टा रुष्टा तु कामान् सकला नभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां त्वामाश्रिता ह्याश्रयतां प्रयान्ति ॥ २९॥

एतत्कृतं यत्कदनं त्वयाद्य धर्मद्विषां देवि महासुराणाम् ।
रूपै रनेकै र्बहुधात्म मूर्तिं कृत्वाम्बिके तत्प्रकरोति कान्या ॥ ३०॥

विद्यासु शास्त्रेषु विवेकदीपे ष्वाद्येषु वाक्येषु च का त्वदन्या ।
ममत्वगर्तेऽति महान्धकारे विभ्रामयत्येत दतीव विश्वम् ॥ ३१॥

रक्षांसि यत्रोग्र विषाश्च नागा यत्रारयो दस्यु बलानि यत्र ।
दावानलो यत्र तथाब्धि मध्ये तत्र स्थिता त्वं परिपासि विश्वम् ॥ ३२॥

विश्वेश्वरि त्वं परिपासि विश्वं विश्वात्मिका धारयसीति विश्वम् ।
विश्वेश वन्द्या भवती भवन्ति विश्वाश्रया ये त्वयि भक्ति नम्राः ॥ ३३॥

देवि प्रसीद परिपालय नोऽरिभीतेर् नित्यं यथासुरवधा दधुनैव सद्यः ।
पापानि सर्वजगतां प्रशमं नयाशु उत्पातपाक जनितांश्च महोपसर्गान्॥३४॥

प्रणतानां प्रसीद त्वं देवि विश्वार्ति हारिणि ।
त्रैलोक्य वासिना मीड्ये लोकानां वरदा भव ॥ ३५॥

देव्युवाच ॥ ३६॥
वरदाहं सुरगणा वरं यन्मनसेच्छथ ।
तं वृणुध्वं प्रयच्छामि जगता मुपकारकम् ॥ ३७॥

देवा ऊचुः ॥ ३८॥
सर्वाबाधा प्रशमनं त्रैलोक्य स्याखिलेश्वरि ।
एवमेव त्वया कार्यं अस्मद्वैरि विनाशनम् ॥ ३९॥

देव्युवाच ॥ ४०॥
वैवस्वतेऽन्तरे प्राप्ते अष्टाविंशतिमे युगे ।
शुम्भो निशुम्भ श्चैवान्या वुत्पत्स्येते महासुरौ ॥ ४१॥

नन्दगोप गृहे जाता यशोदा गर्भ सम्भवा ।
ततस्तौ नाशयिष्यामि विन्ध्याचल निवासिनी ॥ ४२॥

पुनरप्यति रौद्रेण रूपेण पृथिवीतले ।
अवतीर्य हनिष्यामि वैप्रचित्तांस्तु दानवान् ॥ ४३॥

भक्षयन्त्याश्च तानुग्रान् वैप्रचित्तान् महासुरान् ।

रक्ता दन्ता भविष्यन्ति दाडिमी कुसुमोपमाः ॥ ४४॥

ततो मां देवताः स्वर्गे मर्त्यलोके च मानवाः ।
स्तुवन्तो व्याहरिष्यन्ति सततं रक्त दन्तिकाम् ॥ ४५॥

भूयश्च शत वार्षिक्या मनावृष्ट्या मनम्भसि ।
मुनिभिः संस्मृता भूमौ सम्भविष्यां ययोनिजा ॥ ४६॥

ततः शतेन नेत्राणां निरीक्षिष्यामि यन् मुनीन् ।
कीर्तयिष्यन्ति मनुजाः शताक्षी मिति मां ततः ॥ ४७॥

ततोऽह मखिलं लोकं आत्मदेह समुद्भवैः ।
भरिष्यामि सुराः शाकैर् आवृष्टेः प्राणधारकैः ॥ ४८॥

शाकम्भरीति विख्यातिं तदा यास्याम्यहं भुवि ।
तत्रैव च वधिष्यामि दुर्ग माख्यं महासुरम् ॥ ४९॥

दुर्गा देवीति विख्यातं तन्मे नाम भविष्यति ।
पुनश्चाहं यदा भीमं रूपं कृत्वा हिमाचले ॥ ५०॥

रक्षांसि भक्षयिष्यामि मुनीनां त्राण कारणात् ।
तदा मां मुनयः सर्वे स्तोष्यन्त्यानम्र मूर्तयः ॥ ५१॥

भीमा देवीति विख्यातं तन्मे नाम भविष्यति ।
यदारुणाख्य स्त्रैलोक्ये महाबाधां करिष्यति ॥ ५२॥

तदाहं भ्रामरं रूपं कृत्वा सङ्ख्येय षट्पदम् ।
त्रैलोक्यस्य हितार्थाय वधिष्यामि महासुरम् ॥ ५३॥

भ्रामरीति च मां लोकास् तदा स्तोष्यन्ति सर्वतः ।
इत्थं यदा यदा बाधा दानवोत्था भविष्यति ॥ ५४॥

तदा तदावती र्याहं करिष्याम्यरि सङ्क्षयम् ॥ ५५॥

॥ इति श्रीमार्कण्डेय पुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये नारायणी स्तुतिर्नाम एकादशोऽध्यायः ॥ ११॥